ISBN : 13-978-81-932638-0-8

# वेदोक्तनैतिकतायाः पुनः प्रवर्तनोपायाः

–डॉ. शत्रुघ्नपाणिग्रही

वेदः भवति अस्माकं संस्कृतेः आधारः। प्राचीनकालतः आरभ्य वयं वैदिकसिद्धान्तानामाधारेण ...यजीवनस्य दिनचर्यायाः पालनं कुर्मः। वैदिकऋषयः अस्माकं मार्गदर्शकाः आसन्। तेषां मार्गदर्शनेन ... शिक्षिताः दीक्षिताश्च आस्म। यदा कदा नैतिकतायाः विघटने कश्चन जनः आगच्छति तदा तस्य ... कठोरप्रायश्चित्तविधानमासीत्।

उदाहरणरूपेण वक्तुं शक्यते यत् सामविधानब्राह्मणे श्रूयते यदि कश्चन सुरापानं करोति चेत् वर्षं यावत् अष्टमकाले अञ्जलिमात्रं भुञ्जानः, भूमौ शयानः, दिवसे उत्तिष्ठन्, रात्रौ उपविसन्, सर्वेषां सविधे स्वपापं प्रख्यापयेत्। परन्तु इदानीं यदि कश्चन सुरापानं करोति तर्हि स श्रेष्ठः, कुलीनः, आधुनिक इति कथ्यते। इदानीन्तनसमाजे यानि विसङ्गतानि दृश्यन्ते तेषु कतिपयानां विश्लेषणं कर्तुमिच्छामि।

## दाराग्रहणे वेदोक्तनैतिकतत्वानि तेषां पुनः प्रवर्तनोपायाः

इहलौकिकसमृद्धिः जागतिकभौतिकपदार्थेषु निहिताऽस्ति। भौतिकपदार्थसकाशात् प्राप्तसमृद्धिः तात्कालिकशान्तिं प्रापयति। भौतिकपदार्थप्राप्तिनिमित्तं सामान्यकर्मणामावश्यकता भवति। भौतिकसुखेषु गृहवाससुखं नूनं भार्यामूलं भवतीति ज्ञायते वैदिकसाहित्यस्य विचारणेन। तत्र गृहवासे भार्या श्रेष्ठतमः सखेति स्वीक्रियते। धर्मार्थकामास्त्रयोऽपवर्गाः भार्यासहायेनैव सिद्ध्यन्ति। संसारसागरातिक्रमकारिणः पुरुषस्य कृते भार्या मूलमुपादानं भवति। भार्याहीनः पुरुषः कदाचिदपि कर्मयोग्यो न जायते। जायाग्रहणेन एव पुरुषः सम्पूर्णो भवतीति शुक्लयजुर्वेदीयब्राह्मणे उक्तमस्ति[1]। भार्योपेताः पुरुषाः गृहमेधिनः कथ्यन्ते। यदुक्तं–

S.P

"अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा।
भार्या मूलं त्रिवर्गस्य भार्यामूलं तरिष्यतः॥
भार्यावन्तः क्रियावन्तः सभार्या गृहमेधिनः।
भार्यावन्तः प्रमोदन्ते भार्यावन्तः श्रियान्विता॥[2]" इति

---

1. अर्द्धो ह वा एष आत्मनो यज्जाया तस्माद्यावज्जायां न विन्दते नैव तावत्प्रजायते असर्वो हि तावद्भवति, अथ यदैव जायां विन्दतेऽथ प्रजायते तर्हि हि सर्वो भवति॥ इति। शतपथब्राह्मणम्–5/1/6/10
2. महाभारते आदिपर्वणि – 74/41-42

आर्तस्य कृते इयं भार्या सस्नेहसेवाशुश्रूषादिसंपादनेन मातृतुल्या भवति। श्रान्तस्य संसारपथिकस्य कृते भार्या विश्रामस्थलमिति स्वीक्रियते[1]। एतस्मात् कारणात् दाराः वैदिकसाहित्ये परमगतिरिति कथ्यते[2]।

परन्तु साम्प्रतिकसमाजे दाराग्रहणे नैतिकतायाः अभावः परिलक्षते। अधुना पञ्जीकृतविवाहः (Registry marriage), सम्बित्युक्तविवाहः (Contract marriage) इति कारणात् पारिवारिक-सम्पर्कः तथा न सदृढः परिलक्षते यथा वैदिककाले आसीत्। अतः आदौ एते दोषाः दूरिकरणीयाः। वेदोक्तयमयमीसंवादादि- विषयाः पाठ्यक्रमे स्थापनीयाः। पुनः पुरूषेणावश्यं यथाकालं यथोचितं विध्यनुमोदितदारग्रहणेन अमरत्वं जायते इति ऋग्वेदस्य[3] वचनं स्मर्तव्याः।

## प्रजननविधौ नैतिकतत्वानि–

गृहवाससुखं संभोगः इति कथ्यते। संभोगश्चायं मैथुनकारणजन्यो भवति। स्त्रीपुरुषयोः शारीरमेलनं मैथुनं कथ्यते। समुचितदशायां समुचितशारीरसम्पर्केणैतच्च सम्पाद्यते। समुचितपुत्रधर्मफलप्राप्त्यर्थमपि स्वदार- मात्रमुचितं भवति। प्राचीनवैदिककाले एषा नीतिः प्रचलिता आसीत्। गृहस्थस्य कृते स्वदारमात्रं प्रशस्यते। तत्र भार्या अवश्यं सखिरूपेण स्वीक्रियते। श्रूयते एतद् यथा-ऋग्वेदीय-ऐतरीय-आरण्यके-"सखा ह जाया......" इत्यादि। परन्तु इदानीं स्वभार्यायां वर्तमानायां सत्यामपि मनोनिवेशं न कृत्वा परदारगमनं कुर्वन्ति जनाः। तस्मात् कारणात् समाजे अवक्षयः जायते इति पारस्करगृह्यसूत्रे श्रूयते।

मैथुनं यदा कदाचित् कर्तुं न युज्यते। पशुपक्षिण-इतरयोनयः अप्येतदर्थं सचेतना दृश्यन्ते। बुद्धिमान् विवेकपरायणः प्राणी मनुष्यो नूनमत्र नियमं पालयेत्। अन्यथा समाजिकविसंगतिः दृश्यमाना भवेत्। सुधीभिरेतद् ज्ञातव्यं यत् दम्पत्योः मैथुनरूपसम्भोग उभयोः पवित्रसन्तानोत्पत्तिभावनामात्रमाधारीकृत्य भवितव्यः। सर्वसमक्षमेतन्नोचितं भवति। अतएव मैथुनरूपसम्भोगः गोपने कर्तव्यः। तदर्थं कश्चित् कालो वर्तते। यदुक्तम् आपस्तम्बेन–"सदा निशायां दारान् प्रत्यलन्कुर्वीत"।[4] दिवा रतिसम्पादनेन पुरुषः स्वप्राणान् स्कन्दतीति अथर्ववेदीय प्रश्नोपनिषद् वचनम् यथा–"प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते।"[5] पुनश्च मलमूत्रत्यागः होमो दन्तधावनं भोजनं मैथुनं चेति कर्माणि मौनाचरणपूर्वकमनुष्ठेयानि भवन्ति। यथा–

> पुरीषे मैथुने होमे प्रसावे दन्तधावने।
> स्नानभोजनजाप्येषु सदा मौनं समाचरेत्॥[6] इति।

---

1. गृहवासः सुखार्थो हि पत्नीमूलं हि तत्सुखम्॥ इति। दक्षस्मृतौ-4/7
2. न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते। गृहे तिष्ठति सा यावत्तावत्तीर्थसमं गृहम्।।इति। प्रजापतिस्मृतौ-श्लोकः-55
3. यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि।
   जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम्॥ ऋग्वेदसंहितायाम्-5/4/10
4. आपस्तम्बधर्मसूत्रे-1/32/8
5. प्रश्नोपनिषदि-1/13
6. अत्रिस्मृतौ-श्लोकः - 320

Scanned by CamScanner

अतः मैथुनकाले दम्पतिभ्यां मौनम् अवश्यमाचरणीयम्। गर्भाधानसंस्कारकर्मणि व्रती पुरुषः आदौ स्त्रीयोनिं स्पृष्ट्वा वेदमन्त्रं जपति।[1] अनन्तरं यदि गर्भाधानं कुर्यात् तर्हि सुपुत्रःअवश्यं जायते।

परन्तु इदानीम् इत्थं भावेन गर्भाधानसंस्कारो न भवति, येन गर्भो दूषितो भवति, समुचितसन्तानं च न जायते। अनेन विपरीतरीत्योत्पादितं सन्तानं दुश्चरित्रसम्पन्नं भवति। तच्च सन्तानं नैतिकगुणरहितं भूत्वा वर्तमानसामाजिकविसंगतेः मूलकारणं भवति। अनुचितदशायामनुचितयौनसम्पर्केण बालाः दुषिताः भवन्ति। अतः स्त्रीजनानां कृते वैदिकयौनशिक्षाऽपि दातव्या। Gynecology इति पुस्तके लिखितमस्ति यत्–[2] The girl should be educated about the implication of premarital sexuality which may result in illegitimate pregnancy and sexually transmitted disease. She should be educated about the self-protection and moral code of the healthy society where marriage permits sexuality but premarital sexuality wrecks the society.

## संस्कारविधौ नैतिकतत्वानि–

साम्प्रतिककाले सन्तानोत्पत्यनन्तरं पुंसवनसीमन्तोन्नयनादि संस्काराणां सम्पादनम् उपनयनकाले प्रायश्चित्तं कृत्वा एव सम्पादयन्ति परन्तु एतद् न समीचीनम्। एतेषां सर्वेषां संस्काराणां नित्यत्वेऽप्यानुषङ्गिकं फलं वर्तते। येन येनाङ्गपूर्तिसम्भाव्यते। ते संस्कृताः बालकाः उत्तमसमाजस्य गठने सहायकाः भवन्ति। दाम्पत्य- जीवनचर्यायां यथावश्यकसमुचितसन्तानोत्पत्यादिरुपैतत्कर्त्तव्यसंपादनार्थं प्रचोदितो मनुष्यो यथा सावधानो भवेत्तदर्थं सनातनधर्मशास्त्रकारादिभिरस्माकं प्राचीनैर्महर्षिभिः भूयांस्यनुशासनानि प्रदत्तानि। अतः देवेन्द्रवोरा- महोदयस्याभिमतमिदं यत्[3]– It is really surprising that we take great care in planting a seed–the earth is ploughed – cleared of weeds, stones etc; made softer by watering or by rain and then the best of seed in sown in a proper season. However, while planting a human body no care is taken and is left to an accident to take place. It is the bounden duty of a newly married couple to have full knowledge of the body- the human reproduction system and about the birth of a child – besides of course child care. समुचितकाले उपनयनादि संस्काराणां सम्पादनेन समाजस्य स्थितिः सुदृढा जायते। उपनयनार्थं समुचितकालं दर्शयन्त्या धर्मशास्त्रे उपदिश्यते यत् – वसन्ते ब्राह्मणमुपनयीत्, ग्रीष्मे राजन्यम्, शरदि वैश्यम्[4] इति।

## भोजनविधौ नैतिकतत्वानि–

"अन्नो वै ब्रह्म" इति श्रुतिवचनं श्रूयते। अन्नस्य कुत्सारटनपूर्वकं ग्रहणेनाऽमृततुल्यमपि तद्धितकरं

1. ऋग्वेद–10/184/1–3
2. Text Book of Gynecology and contraception-page no-102
3. Health is your Hands–page no-37
4. आप. धर्म. 1/1/1/19

[illegible] बलं वायं च ददाति। समुचितस्यास्थ्यरक्षारूपकल्याणायान्नमित्थं प्रवर्तते। अन्नं स्वादिष्टं रुचिकरमपि कदाचिदग्रहणीयमजीर्णं च भवति। अतः आपोशनक्रियापूर्वकमपि तदन्नं ग्रहणीयमिति वैदिकसिद्धान्तः। यतोहि आपो वै ब्रह्म[1]-इति शतपथब्राह्मणे श्रूयते। अन्नस्य विषापहरणक्रियाऽऽपोशनक्रिया कथ्यते। अन्नग्रहणकाले आदौ "ॐ अमृतोपस्तरणमसि स्वाहा" अन्ते च "ॐ अमृतपिधानमसि स्वाहा" इत्येताभ्यां जलगण्डूषपानमापोशनक्रिया भवति। अन्नग्रहणस्यादावन्ते च जलगण्डूषपानं खाद्यनाडस्यानु- कूलावस्थासम्पादनायान्नस्य जारणे पाचकरसक्षरणाय चोचितं भवति। अपोशनक्रियाऽवलम्बनेनान्नं कदाचिद्धानिकारकं न भवति। अस्य वैदिकगुणस्य पालनं वयं कर्तुं शक्नुमः।

## ब्रह्मचर्यपालने नैतिकतत्वानि-

वेदे बहुत्र ब्रह्मचर्यशब्द आलोचितः। सर्वव्यापको बृहस्पतिः स्त्रिया अभावेन ब्रह्मचर्यव्रतं पालयन् समग्रे जगति विचारयतीति ऋग्वेदे[2] श्रूयते। ब्रह्मचारी दिवं पृथिवीं चेति लोकद्वयं चालयन् चलति। ब्रह्मचारी स्वतपोबलेन स्वर्गलोकं पृथिवीलोकं च धारयति। अपि च स्वकीयतपसा आचार्यस्य पुष्टिं करोति[3]। आचार्यः प्रथमतो विद्यामुपदिश्य ब्रह्मचारिरूपेण प्रकटितो जातः। स ब्रह्मचारी ब्रह्मचर्यरूपतपोबलेन प्रजापतिरभवत्। इन्द्रोऽपि ब्रह्मचर्यसाधनेन देवानां हितार्थाय स्वर्गमाहरदित्यादिब्रह्मचर्यप्रसंगः अथर्ववेदे[4] चापि श्रूयते।

## पञ्चमहायज्ञसंपादनविधौ नैतिकतत्वानि-

ब्रह्मयज्ञो नृयज्ञश्च दैवयज्ञश्च सत्तम।
पितृयज्ञो भूतयज्ञः पञ्चयज्ञाः प्रकीर्त्तिताः॥[5] इति।

पञ्चमहायज्ञाः पारस्करगृह्यसूत्रे[6] प्रतिपादिताः। अग्नौ शास्त्रोक्तविधिनां होमः देवयज्ञः। येन अस्य विश्वस्य पालनं भवति।[7] समावर्तनसंस्कारानन्तरं कृतविवाहस्य यज्ञेष्वधिकारः। पञ्चमहायज्ञाः अहरहः कर्त्तव्याः इति मनुस्मृतौ गृहस्थधर्मप्रसङ्गे प्रतिपाद्यते।[8] जीवदशायां पितृपुरुषाणां वचनपालनम् अवश्यं

---

1. शतपथब्राह्मणम्-1/1/1
2. ऋग्वेदः-10/109/5
3. आपस्तम्बधर्मसूत्रे-1/1/14
4. अथर्ववेदः-11/6/1-16
5. क्रि.यो.-26
6. पारस्करगृह्यसूत्रम्-2/9
7. अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।
   आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥ मनु.-3/76
8. वैवाहिकेऽग्नौ कुर्वीत गृह्यं कर्म यथाविधि।
   पञ्चयज्ञविधानञ्च पक्तिं चान्वाहिकीं गृही॥ मनु.-3/67

S-8

Scanned by CamScanner

कर्तव्यम्। मरणात्परमपि च तेषां कृते अवशिष्टं कर्तव्यं वर्तते। ऋणापाकरणार्थं पितृश्राद्धतर्पणादिसम्पादनं गृहस्थधर्मत्वेन स्वीक्रियते।[1] परन्तु साम्प्रतिककाले एषा रीतिः भारतीयसमाजे न आद्रीयते।

अध्ययनविधौ नैतिकतत्वानि-

"सर्वज्ञानमयो हि सः" इति मनुवचनात् वेदो भवति अपूर्वो कश्चनज्ञाननिधिः। अतएव साध्यरूपिण्या विद्यायाः साधनं शिक्षापि स्वकीयं मूलस्वरूपं वेदात् अधिगतवतीति नात्र संदेहलेशः। वैदिकशिक्षा व्यक्तित्वस्य सर्वाङ्गविकासं साधयति। शरीरं, मनः, बुद्धिरात्माचेत्येषां चतुर्णां मानवीयपक्षाणां समुत्कर्ष एव तस्याः साध्यम्। मानवस्य अन्तर्निहितां प्रतिभां प्रतिबोधयित्वा, तस्य दोषाणां विकाराणाञ्च परिमार्जनं कृत्वा तं पूर्णतां प्रति उन्नेतुमेव वैदिकी शिक्षा प्रयतते। वेदमन्त्रेषु यस्य गायत्रीमन्त्रस्य सर्वाधिकं महात्म्यं वर्ण्यते तेनैव ज्ञायते यद् ब्रह्मचारिणिवुद्धेः विकासः सदाचारस्य च संवर्धनं वैदिकशिक्षायाः प्रमुखमुद्देश्येम्। वैदिकशिक्षायां केचन गुणाः दृश्यन्ते यथा–

वैदिकशिक्षा ईश्वरे बलं ददाति तथा ईश्वरप्राप्तिरेव जीवनस्य मूलं लक्ष्यमिति मन्यते।[2]

प्रकृतिदेव्याः उपासनां स्वीकरोति।[3]

परमात्मनः सत्ता सर्वत्र विद्यतेति स्वीकरोति।[4]

वैदिकसाहित्यं सत्यानां मूल्यानां च प्राप्त्यर्थं ज्ञानं ददाति।[5]

मुक्तिप्राप्त्यर्थं ज्ञानकर्मणोः समुच्चयभावः अपेक्षतेति भावं पोषयति।[6]

विकारभावस्य परिहारार्थं अभेददृष्टिः अपेक्षतेति शुक्लयजुर्वेदः प्रतिपादयति।[7]

---

1. जायमानो वै ब्राह्मणस्त्रिभिः ऋणवाञ्जायते। ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः। कृष्णयजुर्वेदीय-तैत्तिरीयसंहितायाम् – 6/3/10/5
2. उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत-कठोपनिषद्-1/3/14
3. शुक्लयजुर्वेदः-1/25-26

   अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।
   दुदोह यज्ञसिद्ध्यर्थं ऋग्यजुःसामलक्षणम्।। मनुस्मृति-1/23
4. ईशा वास्यमिदं सर्वं – शुक्लयजुर्वेदः-40/1
5. सत्यं ज्ञानम् अनन्तं ब्रह्म – तैत्तिरीयोपनिषदि-2/1
6. विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
   अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।। शुक्लयजुर्वेदः-40/14
7. यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
   सर्वभूतेषु चात्मानं ततो न वि जुगुप्सते।। शुक्लयजुर्वेदकाण्वसंहिता-40/6

S.P

परन्तु साम्प्रतिकसमाजे औद्योगिकविफोटेन, मूल्यबोधस्य अधःपतनेन च किं कर्तव्यं किं न कर्तव्यम् इति विषये मानवाः उपर्युक्त वैदिकसिद्धान्तान् मूल्यबोधाञ्च विस्मरन्ति। शारीरिकसुखं सर्वोपरि विचिन्त्य अन्धवत् भौतिकवादं पाश्चात्यसिद्धान्ताञ्च स्वीकुर्वन्ति। मूल्यभितिकशिक्षां विना आधुनिकसमाजे सदाचारस्य, परोपकारस्य, नैतिकतायाः, चारित्रस्य अभावः परिलक्षिती जायते। इदानीं मानवाः त्यागमूल्यं विस्मृत्य भोगमूल्यं स्वीकुर्वन्ति। "तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्"[1] इति ईशोपनिषदः वचनं सर्वैः विस्मृतम्। ईश्वरेण सृष्टमिदं जगत् ईश्वर एव। अतः सर्वम् ईश्वरस्य न किमपि ममास्तीति भावनया त्यागपूर्वकं भोगः करणीयः। वैदिकशिक्षायाः उद्देश्यमासीत् उत्तममानवनिर्माणम्। तत्र व्यष्टिमुखस्वार्थापेक्षया समष्टिमुखस्वार्थभावना सर्वत्र दरीदृश्यते। "सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै तेजस्वि नावधीतमस्तु मा विद्विषावहै"[2] इति भावना वैदिकयुगे आसीत्। परन्तु सर्वे भवन्तु सुखिनः इति भावना इदानीं कस्यापि मनसि नागच्छति। एतस्य मुख्यकारणं भवति मानवीयमूल्यबोध-स्याभवः। तत् केवलं अध्यात्मशिक्षया सम्भविष्यति। तदर्थं शुक्लयजुर्वेदीय मन्त्रः श्रूयते यथा–

**यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥इति।**[3]

वैदिकयुगे गुरुशिष्यसम्बन्धः उत्तमः आसीत्। तदा अध्यापकानां स्थानं सर्वोपरि आसीत्। अथर्ववेदे आचार्यो मृत्युर्वरुणः सोम इत्युच्यते।[4] तदा विद्याध्ययनार्थं शिष्यः गुरुकुलं प्रति गच्छति स्म। आधुनिकयुगे यद्यपि इयं व्यवस्था आवासिकविद्यालयरूपेण अग्रे सरति तथापि तत्र दोषाः दृश्यन्ते। यतोहि इदानीं या शिक्षा प्रचलति सा अक्षरशिक्षामात्रम्, यस्यां लौकिकभौतिकज्ञानयोः तु समावेशोऽस्ति, परमन्तःकरणस्य विकासो न जायते। सा अपूर्णा निष्प्रयोजनैव शिक्षा साम्प्रतिकसामाजिक-विसंगतेः मुख्यकारणं भवति।

उपर्युक्तविवेचनेन ज्ञायते यत् वैदिकसाहित्यं सुसमृद्धसमाजसंगठने अस्मान् सततं प्रचोदयति। वैदिक- सिद्धान्ताः प्रतिजनमाश्रिताः भवेयुः चेत् सर्वेषां कल्याणाय ब्रह्माण्डमिदं प्रवर्तेत। यतो हि कश्चिदपि सर्वकारः अस्माकं समाजस्यैव दर्पणभूतो भवति, अतः यदि पूर्वोक्तसंस्कारणामनुपालनेन, पुनर्जीवनकरणेन वयं संस्कारिता भविष्यामः, तदाऽस्माकं युवानोऽपि प्राप्तसंस्काराः समाजोद्धारकाः राष्ट्रियभावनोपेताः, अहिंसकाः सर्वधर्मसमवायप्रियाश्च भविष्यन्ति, येन तेषामाधारेण सर्वकारः शुद्धः भविष्यति। अतोऽस्माकं भारतीयसंस्कृतिपोषकेषु शास्त्रेषु वेदाश्रितेषु यानि नैतिकतत्त्वानि विलसन्ति तेषामनुपालनमवश्यमेवास्माभिर्भारतीयैः विधेयानीति शम्।

S.P

***

1. ईशोपनिषदि-1
2. कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि-2/1
3. शुक्लयजुर्वेदः-40/7
4. आचार्यो मृत्युर्वरुणः सोम ओषधयः पयः। अथर्ववेदः-11/5/14

# पुनती

( राष्ट्रियवेदसङ्गोष्ठ्याः इतिवृत्तं तत्र प्रस्तुतानां
निबन्धानां सङ्ग्रहश्च )

राष्ट्रियसंस्कृतसंस्थानम्
( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्यां प्रत्यायितः समविश्वविद्यालयः )
श्रीरणवीरपरिसरः, कोट-भलवाल, जम्मूः - 181122

Scanned by CamScanner